# व्याकरणे पदपदार्थविचारः

डा. राजीव् पी.पी

**उपक्रमः**

व्याकरणशास्त्रे वर्णानां संघातः पदमित्यभिधीयते। ते च अवयवाः वर्णाः अर्थवन्तः भवन्ति[1]। अतः वर्णसमुदायरूपं पदमपि अर्थवत्। पदसंघातो भवति वाक्यम्। अतः तादृशसंघातरूपवाक्यस्यापि अर्थवत्त्वं सिद्ध्यति। एवं स्थिते वाक्यवाक्यार्थाखण्डपक्षः कथं स्वीकर्तुं शक्यते इति विरोधाशङ्का अत्र भवति। यथा पदानामर्थवत्त्वं वाक्यार्थे तथा वर्णानाम् अर्थवत्वस्य पदानामर्थवत्वे उपयोगः नास्ति। वर्णार्थघटितत्वस्य अननुगमः एव पदार्थे भवति। एवं वर्णानाम् अर्थवत्त्वाभावे पदे वर्णरूपा अवयवाः न सन्ति। एवम् अर्थयुक्तानां पदानां संघातः क्वचित् अर्थवान् भवति चेदपि अर्थान्तरेण संयुक्ते सति अनर्थकः भवति[2]। यथा 'देवदत्त गामभ्याज दण्डेन' इत्यादिः पदसंघातः अर्थवान् भवति। किन्तु दशदाडिमानि षडपूपाः इत्यादौ परस्परसम्बन्धविगमेन पदसंघाताः अनर्थकाः।।

क्वचित् अर्थवतः संघातात् अर्थवान् उपजायते अथवा संघातार्थवत्वात् अवयवार्थवत्त्वं भविष्यति। यथा राजपुरुषः इत्यत्र 'राजा' 'पुरुषः' इति द्वे पदे स्तः। अत्र राजशब्दः पुरुषशब्दः च अर्थवन्तौ भवतः। एतयोः पदयोः संयोगे सति राजपुरुषः उ राजसम्बन्धिपुरुषः इति अर्थावगतिः भवति। अत्र अर्थवद्भ्यः अवयवेभ्यः समुदायार्थः उपजायते। अत एव संग्रहकारः एवं वदति विविधाः समुदायाः शब्दान्वयिनो अर्थान्वयिनः शब्दार्थान्वयिनश्च इति[3]। अत्र गौरखरः, अष्टाकर्णः इति शब्दान्वयस्य उदाहरणे भवतः। 'क्षतात् त्रायते इति क्षत्रियः' 'विदूरात् प्रभवति इति वैदूर्यः' इत्यत्र अर्थस्यैव अन्वयो भवति। अतः एते अर्थान्वयस्य उदाहरणे भवतः। किन्तु क्वचित् शब्दस्य अर्थस्य च अन्वयो भवति। राजपुरुषः, नीलोत्पलम्, ब्राह्मणकम्बलः इत्यादीनि अत्र उदाहरणानि भवन्ति। किन्तु स्वार्थिकादिषु एवं न सम्भवति। तद्यथा स्वार्थिकानाम् उपर्युक्तवत् अर्थवत्त्वस्वीकारे सति शेषसमुच्चयादिक्रिया

कारकविशेषणविशेष्यसम्बन्धाभावः भविष्यति। अथवा अवयवार्थप्रकृतिकम् अर्थान्तरं स्वार्थिकादिषु न आविर्भविष्यति। अत एव अवयवार्थव्यतिरिक्तसंघातार्थस्य सम्भवः स्वार्थिकादिषु नास्ति।।

**पदवादिनां मतस्य विचारः।**

पदवादिनां मतमधिकृत्य अत्र विचारः क्रियते। अत्र महाभाष्यकारः पतञ्जलिः अभिप्रैति यत्- " न लक्षणेन पदकारा अनुवर्त्याः, पदकारैर्नाम लक्षणमनुवर्त्यम्। यथालक्षणं पदं कर्तव्यम्[४]" इति। एवं पदवादिनां मते पदानां साधुता स्यात् तदा पदानि स्वत एव सिद्ध्यन्ति। एवं स्थिते 'पदानि कुर्वन्ति' इति पदवादिनां मतमसङ्गतं भवति। लक्षणेन च तदनुवर्त्तनं भवति। अत एव पतञ्जलिः पदकारैर्नाम लक्षणमनुवर्त्त्यमित्यस्य असङ्गतत्वं स्वीकृतवान्। अप्रयुक्तानां पदानां विषये तु पदानाम् असत्यत्वात् तेषां विभागः न सिद्ध्यति। अतः पदलक्षणानुसारेण पदकरणम् अप्रयुक्तमिति अनुपपन्नमेव। एतस्मात् पदानि असत्यानि इति सिद्ध्यति।

वाक्यवादिनः वाक्यस्य अभेदकल्पनमङ्गीकुर्वन्ति। किन्तु पदवादिनः पदमेव सत्यमिति मत्वा एकमखण्डं वाक्यं काल्पनिकमाहुः। 'पदप्रकृतिः संहिता[५]' इति प्रातिशाख्यवचनमुक्त्वा ते स्वमतस्य प्रामाण्यम् उपस्थापयन्ति। अत्र 'पदानि प्रकृतिर्यस्य सा संहिता' इत्यर्थः। अतः पदानाम् असत्यत्वम् अङ्गीक्रियते चेत् तत्कारणिकायाः संहितायाः अपि असत्यत्वं भविष्यति इति पदवादिनः मन्यन्ते। किन्तु तन्न युक्तमिति हरेः अभिप्रायः। तद्यथा-

"पदप्रकृतिभावश्च वृत्तिभेदेन वर्ण्यते।

पदानां संहिता योनिः संहिता वा पदाश्रया[६]।। इति। अत्र 'पदप्रकृतिः संहिता' इति षष्ठीसमासेन व्याख्या कार्या इति हरिः अभिप्रैति। तथा सति 'पदानां संहिता योनिः' इत्यर्थः सिद्ध्यति। अत्र अखण्डपक्षः एव सम्भवति। अतः प्रातिशाख्ये यदुक्तं तस्य दोषो नास्ति, किन्तु 'पदप्रकृतिः संहिते'ति प्रातिशाख्यवचनं स्वमतस्य प्रमाणमिति पदवादिनां मतं स्वीकर्तुं न शक्यते।।

पदानां साधुतां पदवादिनः स्वीकुर्वन्तीति पूर्वमुक्तम्। किन्तु तेषां मतं शास्त्रेण साधयितुं न शक्यते। अत्र अखण्डवाक्यवादिनः एवं वदन्ति- प्रतिवर्णं पदार्थप्रत्ययः जायते

चेत् पदवादिनां मतस्य शास्त्रीयता अस्तीति वक्तुं शक्यते। किन्तु लोके तथा न दृश्यते। यथा देवदत्तः इति पदे दकारादि प्रत्येकं वर्णेषु देवदत्तप्रत्ययो न जायते। अथवा 'देवदत्त गामभ्याज दण्डेन' इत्यादि वाक्यार्थस्य देवदत्तादिषु प्रत्येकं पदेषु देवदत्तप्रत्ययः नास्ति। एतस्मात् पदानि अनर्थकानि इति निश्चयेन वक्तुं शक्नुमः। अर्थात् वाक्यान्येव अर्थवन्ति तत एव लोके अर्थदर्शनात्।।

पदान्यनर्थकानि इति अखण्डवाक्यवादिनां मतं पदवादिनः न स्वीकुर्वन्ति। यतः पदे वर्णाः अर्थवन्तः वाक्ये पदानि च। अथवा वर्णानां पदानां च अर्थवत्त्वाभावे वाक्यस्य अर्थवत्त्वं कथं सिद्ध्यतीति तेषामभिप्रायः। यथा रजःप्रभृतीनि सूक्ष्माणि वस्तूनि केवलम् एकैकरूपेण द्रष्टुं न शक्यन्ते। किन्तु अन्येन केनचित् सजातीयेन विलक्षणेन वा संसृष्टं सद् दृश्यते। एवमत्रापि अर्थवन्तः अपि वर्णाः प्रत्येकं न संप्रत्यायकाः, किन्तु अन्यैः वर्णैः संसृष्टाः वाचका भवन्ति। एवं यथा वर्णानामर्थवत्त्वं सिद्ध्यति तथैव पदान्यपि अर्थवन्तीति पदवादिनः अभिप्रयन्ति। अर्थात् परस्परशक्त्यावेशात् समुदिताः वर्णाः यथा वाचकाः भवन्ति तथा पदान्यपि। अत एव वर्णपदव्यतिरिक्तस्य वाक्यस्य सत्ता स्वीकर्तुं न शक्यते। अत एवोक्तं हरिणा पदकाण्डे-

"यावन्तो यादृशा ये च यदर्थप्रतिपादने।
वर्णाः प्रज्ञातसामर्थ्यास्ते तथैवावबोधकाः "[7]।। इति।

**पदपदार्थनिराकरणम्।**

पदपदार्थयोः सत्यत्वं नास्तीति पूर्वं प्रतिपादितम्। अत्र पदवादिमतदूषणाय अन्यानि कानिचन प्रमाणान्यपि अखण्डवाक्यवादिनः अस्माकं पुरतः स्थापयन्ति। तद्यथा-यदि वर्णसंघातः पदम्, वर्णा अप्यर्थवन्तः, पदमप्यर्थवत्, पदसंघातश्च वाक्यम्, संघातस्यापि चार्थवत्त्वम्। एवं स्वीक्रियते चेत् वाक्यवाक्यार्थाखण्डत्वपक्षः कथं सम्भवतीति पदवादिनः पृच्छन्ति। अत्र अखण्डवाक्यवादिनामभिप्रायं हरिः एवं प्रकाशयति यत्-

"अनर्थकानां सङ्घातः सार्थकोऽनर्थकस्तथा।

वर्णानां पदमर्थेन युक्तं नावयवाः पदे[8]"।। इति। अत्र हरेः अयमभिप्रायः वर्त्तते यत् अनर्थकानां वर्णानां सङ्घातः सार्थकः अनर्थकः इति द्विविधो भवति। अत्र वर्णानाम् अर्थवतः संघातस्योदाहरणं घट इति। अनर्थकस्य संघातस्योदाहरणं कचटेत्यादि च।

अस्मिन्नुदाहरणे वर्णानामर्थवत्त्वस्य पदार्थवत्व उपयोगाभावात् संघातार्थवत्त्वे पदमेव अर्थेन युक्तं भवति, न वर्णाः। अथवा पदार्थे वर्णार्थघटितत्वस्याननुभवात् यथा पदानामर्थवत्त्वस्य वाक्यार्थे उपयोगोऽस्ति न तथा वर्णानामर्थवत्त्वस्य पदार्थे। एवं वर्णानामर्थवत्त्वाभावात् वर्णरूपाः अवयवाः पदे न सन्तीति सिद्ध्यति। अत्र अम्बाकर्त्रीकारः एवमभिप्रैति- "अथवेदं पद्यमन्यथा व्याख्येयम्- वर्णानामर्थवतां संघातः सार्थको यथा- 'ओम्' इति। अत्राकारोकारमकारा वर्णा यथाक्रमं विष्णुशिवब्रह्मरूपैरर्थैरर्थवन्त-स्तत्संघातोऽप्यर्थवान्, परापरब्रह्मान्यतररूपेणार्थेनार्थवत्त्वात्। तथाऽनर्थकानां वर्णानां संघातोऽनर्थको यथा खथफादिः[९]" इति। एतस्मात् पदम् अर्थेन युक्तमिति सिद्ध्यति। एवं पदार्थे वर्णानाम् अननुभवात् पदे वर्णरूपाः अवयवाः न सन्तीति च ज्ञातुं शक्यते।।

अनर्थकानां वर्णानां संघातस्य द्वैविध्यम् उपरि प्रतिपादितम्। एवम् अर्थयुक्तानां पदानां संघातस्यापि द्वैविध्यं वर्त्तते। तदुक्तं हरिणा-

"पदानामर्थयुक्तानां सङ्घातो भिद्यते पुनः।

अर्थान्तरावरोधेन सम्बन्धाविगमेन च[१०]"।। इति। अत्रायमर्थः यत्-अर्थयुक्तानां पदानां वाक्यरूपः संघातः अपि अर्थान्तरावरोधेन सम्बन्धविगमेन च द्विविधो भवतः। अत्र अर्थान्तरावरोधेन इत्यस्य पदार्थापेक्षया संसर्गलक्षणस्यार्थस्य आत्मन्यवरुध्य परिग्रहणेन इत्यर्थः। 'देवदत्त गामभ्याज शुक्लां दण्डेन' इत्यादिः पदसंघातोऽर्थवान् इति अत्र उदाहरणं भवति। एवं सम्बन्धविगमेन इत्यस्य पदार्थयोः वाक्यार्थयोः वा परस्परं सम्बन्धस्य अभावेन इत्यर्थः। अस्योदाहरणं 'दश दाडिमानि षडपूपाः' इत्यादीनां वाक्यार्थानां परस्परं सम्बन्धस्याभावेन अनर्थका इति। एवमर्थवान् संघातः द्विविधो भवति। अत्रायं सन्देहः जायते यत् वर्णानाम् अर्थवत्त्वस्याभावे "अर्थवन्तो वर्णाः, धातुप्रातिपदिकप्रत्ययनिपातानाम् ेकवर्णाना-मर्थदर्शनात्[११]" इति वार्तिकस्य साधुत्वं कथं सम्भवतीति। अत्रेदं समाधानं यत् वस्तुतः वर्णानामर्थवत्त्वस्य लौकिकव्यवहारे प्रयोजनं नास्ति चेदपि शास्त्रप्रक्रियानिर्वाहार्थं वर्णानामर्थवत्त्वस्य प्रयोजनं वर्त्तते। अत एव "अर्थवन्तो वर्णाः...." इति वार्तिकस्य असाधुत्वं न सम्भवति। अत्रेदमपि अवगन्तव्यं यत् यदि वर्णानामर्थवत्त्वं स्वीक्रियते तर्हि पदं वाक्यञ्च अर्थवद्वर्णसमुदाय एव स्यात्। एवं पदवाक्ययोः वर्णेभ्यः कश्चित् स्वरूपभेदः न सम्भवति। अर्थबोधने वर्णानां परस्परापेक्षावत्या शक्त्या वर्णः एवाभिधायकः स्यात्, वर्णानतिरेकात् न पदं वाक्यं वा। अथवा परस्परापेक्षा वर्णा एव वाचकाः भवन्ति। एवं

वर्णानाम् अर्थवत्त्वे तु तेभ्यः पदवाक्ययोरर्थवतोरात्मभेदात् तयोरेवाभिधायकत्वं लोकसिद्धं सिद्धमिति अत्र हरेः अभिप्रायः वर्त्तते।

वाक्यवाक्यार्थयोरिव पदपदार्थयोः अपि सत्यत्वं स्वीक्रियते तर्हि कस्मिंश्चित् वाक्ये पदग्रहणपूर्वकं शक्याऽर्थमन्यथा विधेयतया निषेध्यतया वा प्रतिपद्यते। एवं पश्चात् तस्मिन्नेव वाक्ये तमेवार्थं लक्षणया व्यञ्जनया वा अन्यथा प्रतिपद्यते च। अथवा एकस्मिन्नेव वाक्ये विधेयतया निषेध्यतया च वाक्यार्थप्रतिपत्तिः सम्भवति। पुण्यराजः अत्र- 'उदहारि भगिनि ! या त्वं शिरस्यनड्वाहं वहसि सा त्वं प्राचीनं कुम्भमभिधावन्तमद्राक्षीः[12]" इति उदाहरणं वदति। अस्मिन्नुदाहरणे वाक्यपरिसमाप्तेः प्राक् पदार्थप्रतिभासावसरे विरुद्धः पदार्थानामभिसम्बन्धः अवगम्यते। एवं वाक्ये समाप्ते च, वाक्यार्थप्रतिपत्यवसरे पदार्थानां योग्यताबलात् अन्यथा सम्बन्धं कृत्वा अन्यथा वाक्यार्थं प्रतिपद्यते च। एतस्मात् वाक्ये पदपदार्थयोः सत्यत्वं नास्तीति सिद्ध्यति।।

एवं पदपदार्थयोः स्वीकारे प्रतिषेधोऽपि न उपपद्यते। तद्यथा आदौ पदग्रहणपूर्वकं पदार्थः प्रतिपन्नः भवति। किन्तु पश्चात् वाक्यार्थप्रतिपत्त्यवसरे तस्यार्थश्य परित्यागेन अन्य एवार्थः उपजायते। 'इहाद्य धवखदिरपलाशाश्च्छेद नीया न' इति अत्र उदाहरणं भवति। अस्मिन्नुदाहरणे प्रथमं धवखदिरपलाशानां छेदनलक्षणोऽर्थः उपादीयते। पश्चात्तु 'न' इति निषेधेन पूर्वमुक्तछेदनक्रियातः निवर्त्तनं क्रियते। एतत् युक्तं नास्ति। यतः अत्र उपात्तस्य त्यागे सति शब्दार्थसम्बन्धस्य अनित्यत्वस्य प्राप्तिः भवति। अतः तेषां तत्र अनाश्रयणमेव युक्तं भवति। एवं पूर्वं नञ्पादार्थप्रयोगाभावे पदग्रहणपूर्वकम् आदौ यः पदार्थः प्रतिपन्नः, तत्समन्वयेन च यो वाक्यार्थः प्रतिपन्नः, पश्चात् नञ्पदप्रयोगे पुनः वाक्यार्थान्तरप्रतिपत्त्यवसरे तत् पदार्थतद्वाक्यार्थपरित्यागेन ततोऽन्य एव वाक्यार्थ उपजायते इत्यतः पदपदार्थयोः सत्यत्वं स्वीकर्तुं न शक्यते।।

पदपदार्थयोः असत्यत्वे वाक्यवाक्यार्थयोरेव सत्यत्वम् अस्तीति अवगन्तव्यम्। यथा 'वृक्षो नास्ति' इति वाक्यं पश्यामः। अस्मिन् वाक्ये अखण्डं विशिष्टभावलक्षणं भवतीत्यतः एतस्मात् वृक्षाभावावगतिरूपस्य वाक्यार्थस्य लक्षणं प्रत्यायकं भवति[13]। किन्तु अत्र पदपदार्थः व्यतिरिक्तरूपेण अभ्युपगम्यते चेत् वृक्षलक्षणं पदार्थे व्यवस्थितं भविष्यति। तदा स्वकारणाल्लब्धसत्ताकेन व्यवस्थितेन वृक्षपदार्थेन नञर्थस्य निषेधस्य सम्बन्धो

नोपपद्यते। अत्र जातस्य सतो निवृत्तिः कर्तुं न शक्यते। अथ बुद्धौ सत्त्वेऽपि बहिरसत एव वृक्षपदार्थस्य नञर्थेन सम्बन्धः भविष्यति। तथा सति असत्वादेव असौ सम्बन्धः इत्यतः अत्र नञः वैयर्थ्यं सम्भवति। अत एवोक्तम्-

"सतां च न निषेधोऽस्ति सोऽसत्सु च न विद्यते।

जगत्यनेन न्यायेन नञर्थः प्रलयं गतः [१४]"।। इति। एतस्मात् अर्थस्य स्वत एव निवृत्तिः सम्भवतीत्यतः तेन सह निवृत्तिवाचकस्य सम्बन्धः न विद्यते। किन्तु विच्छेदेन या पदार्थविषयबुद्धिः अवधृता भवति सा बुद्धिः नञा विचार्यते। एतस्मात् बुद्धावपि नञ सम्बन्धः न उपपद्यते इति ज्ञातुं शक्यते। तद्यथा शब्दवाच्योऽर्थः एव नञा प्रतिषिध्यते। अत्र बुद्धिः शब्दवाच्या न भवतीत्यतः सा बुद्धिः नञा न प्रतिषिध्यते। बाह्यः अर्थ एव शब्देन अभिधीयते। अत्र बुद्धिः अर्थालम्बना शब्दाभिधेयत्वं न अर्हति। अत्रायं सन्देहः भवति यत् यदि नञा वृक्षास्तित्वविषया बुद्धिः न निवर्त्यते, किन्तु तस्या नञा मिथ्यात्वमेवावेद्यत इत्युच्यते, तदापि वृक्षस्याभावावगतिः ततः न स्यात् इति। अत्र सन्देहस्यावश्यकता नास्ति। यतः एवं न सम्भवति। अत्र कारणमिदं भवति यत् बुद्धिविषयात्मके व्यापारे नञः अङ्गीक्रियमाणे सति वृक्षो नास्तीत्यत्र वृक्षाभावावगतिः न सम्भवति। एवं सादृश्यप्रतिपत्तिविधायिनि पर्युदासे नञ्वाच्ये वृक्षप्रवेदनस्य मिथ्यात्वावेदनम् उपपद्यते। तद्यथा वृक्षो नायम्, किन्तु वृक्षसदृशः, अतो वृक्षज्ञानं मिथ्येति। नञः प्रसज्यप्रतिषेधे तु वृक्षाभाव एव वाक्यार्थः इत्यतः अत्र एतत् न उपपद्यते। एवं 'न ब्राह्मण' इत्यादौ नञ एव अर्थवत्त्वं भवतीत्यतः अन्येषाम् आनर्थक्यं भविष्यतीति वक्तुं न शक्यते। अत एव 'वृक्षो नास्ति' इत्यादिरूपादखण्डाद् वाक्यात् अखण्ड एव तत्तत्पदार्थोपहिताभावरूपः वाक्यार्थः प्रतीयते। अतः प्रत्येकं पदार्थाः असत्यभूताः इति ज्ञातुं शक्यते।।

एवं पदपदार्थस्य अस्वीकारे अपरः हेतुरुच्यते यत् स्तुतिनिन्दाप्रधानेषु वाक्येषु पदार्थसत्त्वे पूर्वं निन्दास्तुतिप्रतीतिः न उपपद्यते इति [१५]। तद्यथा स्तुतिप्रधानं वाक्यं भवति किन्तु तत्र पदार्थे प्रतिभासवेलायां निन्दा अवगम्यते। "कः स्वर्धुनि विवेकस्ते नयसे पापिनो दिवम् [१६]" इति अत्र उदाहरणं भवति। अत्र गङ्गायाः विवेको नास्तीति निन्दाव्याजेन महापातकिनामपि पापप्रशमनेन स्वर्गप्रदानशक्ता इति गङ्गायाः प्रभावातिशयस्तुतिः क्रियते। एवं निन्दाप्रधानं वाक्यं भवति किन्तु तत्र पदार्थे प्रतिभासवेलायां स्तुतिः अवगम्यते। अत्र उदाहरणम्-

साधु दूति पुनः साधु कर्तव्यं किमतः परम्।

यन्मदर्थे विलूनासि दन्तैरपि नखैरपि [१७]।। इति। अत्र नायकं समानेतुं प्रेषिता दूति स्वयं तत्संभोगमनुभूय समागता। तदा शरीरे परिदृश्यमानैः दन्तनखक्षतैः ज्ञाततत्त्वया नायिकया एवं स्तुतिव्याजेन निन्द्यते। एवं पदार्थसत्यत्वाङ्गीकरणे स्तुतिनिन्दाप्रधानेषु वाक्येषु पूर्वं निन्दास्तुतिप्रतीतिः न उपपद्यते।।

पदेषु असंसृष्टरूपेणावस्थितः अर्थ एव एकस्य वाक्यार्थस्य प्रतिपादने अभ्युपायः भवतीति पदवादिनः मन्यन्ते। तथा सति वाक्यार्थावसायः पदार्थपूर्वक एव व्यवस्थितः भवतीति सिद्ध्यति। तन्न युक्तम्। यतः पदेषु असंसृष्ट इव स्थितः क्रमात् च उपचीयमानो यो वाक्यार्थः स विशिष्टतरः भवति। छिन्नग्रथितकल्पत्वं भवति अत्र कारणम् [१८]। अत्र उदाहरणमुच्यते अम्बाकर्त्रीकारेण यत्- "यथा पूर्वं छिन्नं कपालान्तरेणासंसृष्टं कपालं पश्चात् ग्रथितं कुम्भकारेण कपालान्तरेण संयोजितमपरं वस्तु घटाख्यं कपालादत्यन्तभिन्नमेव, न तु कपालात् भिन्नाभिन्नमिति नैयायिकाः, तद्वदयं बौद्धपदार्थसंसर्गप्रभवो बौद्धो वाक्यार्थः अत्यन्तं भिन्न एव पदार्थान्न तु भिन्नाभिन्नः पदार्थ इति, वाक्यार्थ इति च भिन्नाभिलापप्रत्यय गोचरत्वादिति [१९]" इति। एवं पूर्वं छिन्नः पश्चात् ग्रथितः यः तत्तुल्योऽसौ इति असंसृष्ट पदार्थपूर्वकः वाक्यार्थावसायः स्वीकर्तुं न शक्यते। अत एव पदपदार्थानां सत्यत्वं नास्तीति ज्ञातुं शक्यते।।

**उपसंहारः**

उपर्युक्तैः विवरणैः सर्वा इयं पदपदार्थकल्पना वृथेति ज्ञातुं शक्यते। एवं न केवलं पदपदार्थकल्पना किन्तु स्थान्यादेशभावकल्पनाभेदाः, प्रकृतिप्रत्ययतदर्थकल्पनाभेदाः, आगमविकारादिकल्पनाभेदाः च वृथा भवन्ति। वस्तुतः अबुधबोधनायैव एतादृशपदपदार्थ कल्पनादयः क्रियन्ते। तदुक्तं हरिणा-

"उपायाः शिक्षमाणानां बालानामुपलालनाः।

असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते [२०]।। इति। एवं वेदान्तशास्त्रेऽपि क्वचिज्जगतः सक्रमा सृष्टिः श्राव्यते, क्वचिदक्रमा, क्वचिद्वियदादिका, क्वचित्तेज आदिकेति जगत्सर्गप्रक्रियाभेदाः समुपलभ्यन्ते। अतः न केवलं व्याकरणशास्त्रे किन्तु शास्त्रान्तरेष्वपि अबुधानां बोधनोपयोगिव्यवहारायाऽविद्यमानैवासत्या

प्रक्रिया भेदेनोपवर्ण्यते इति ज्ञातुं शक्यते।।

टिप्पणी

१ तदुक्तं व्याकरणमहाभाष्ये - "संघातार्थवत्वाच्च मन्यामहे अर्थवन्तो वर्णा इति"। पतञ्जलिः- महाभाष्यम्- "हयवरट्" सूत्रव्याख्याने पृ-१३३

२ तदुक्तम्।

"अनर्थकानां संघातः सार्थकोऽनर्थकस्तथा।।

वर्णानां पदमर्थेन युक्तं नावयवाः पदे "।। इति। भर्तृहरिः- वाक्यपदीयम् - २-२०५

३ तत्रैव २-२०८ तमकारिकायाः स्वोपज्ञवृत्तिः - पृ- २४१

४ पतञ्जलिः- महाभाष्यम्- १-३-१०९, पृ- १४५

५ द्रष्टव्यं- भर्तृहरिः- वाक्यपदीयं २-५७ तम कारिकायाः पुण्यराजकृतव्याख्यानम्- पृ-२४

६ तत्रैव - २-५८

७ तत्रैव ३-६३

८ तत्रैव-२-२०५

९ तत्रैव- अम्बाकर्त्रीव्याख्यानम्- पृ-२९४

१० तत्रैव- २-२०६

११ महाभाष्यम्- भागः-१, "हयवरट्" सूत्रभाष्ये-पृ-१३१.

१२ भर्तृहरिः वाक्यपदीयम्-२-२४६ तमकारिकायाः पुण्यराजकृतव्याख्यानम् पृ-१०१.

१३ तदुक्तं हरिणा-

"वृक्षो नास्तीति वाक्यं च विशिष्टाभावलक्षणम्।

नार्थेन बुद्धौ सम्बन्धो निवृत्तेरवतिष्ठते"।। भर्तृहरिः वाक्यपदीयम् २-२४१

१४ तत्रैव- पुण्यराजकृतव्याख्यानम्- पृ-९९

१५ तदुक्तं हरिणा-

"स्तुतिनिन्दाप्रधानेषु वाक्येष्वर्थो न तादृशः।

पदानां प्रविभागेन यादृशः परिकल्प्यते॥। तत्रैव २-२४७.

१६ अप्पय्यदीक्षितः-कुवलयानन्दम्-६८

१७ तत्रैव-६९

१८ तदुक्तं हरिणा-

"पूर्वं पदेष्वसंसृष्टो यः क्रमादुपचीयते।

छिन्नग्रथितकल्पत्वान्न विशिष्टतरं विदुः॥ भर्तृहरिः वाक्यपदीयम २-१४९.

१९ तत्रैव- अम्बाकर्त्रीव्याख्यानम्- पृ-३२६.

२० तत्रैव- २-२३८.

**सहायकग्रन्थसूची**


तारानाथतर्कवाचस्पतिः - वाचस्पत्यम्-भागः - ६, चौखम्बा संस्कृत सीरिज़ आफिस्, वाराणसी-१. तृतीयं संस्करणम्- १९७०.

नागेशभट्टः - वैयाकरणसिद्धान्तमञ्जूषा, डाकालिकाप्रसादशुक्लः (सं),सम्पूर्णानन्दसंस्कृतविद्यविद्यालयः, वाराणसी-२२१००२, प्रथमं संस्करणम्- १९७७.

: वैयाकरणसिद्धान्तलघुमञ्जूषा, आचार्य श्री रामप्रसादत्रिपाठी (सं),सम्पूर्णानन्दसंस्कृत विश्वविद्यालयः, वाराणसी- २२१००२, प्रथमं संस्करणम्- १९९७.

: परमलघुमञ्जूषा, डा. जयशङ्कर लाल त्रिपाठी (सं), कृष्णदास अकादमी, वाराणसी-२२१००१. द्वितीयं संस्करणम्- १९९७.

पतञ्जलिः - व्याकरणमहाभाष्यम्-(१-६ भागाः) भार्गवशास्त्री जोशी (सं), चौखम्बा संस्कृतप्रतिष्ठान्, दिल्ली, पुनर्मुद्रित- संस्करणम्- १९९२.

पाणिनिः - अष्टाध्यायी, श्रीश चन्दवसुः (सं), मोतिलाल बनारसीदास दिल्ली, प्रथमं संस्करणम्- १९६२.

भर्तृहरिः - वाक्यपदीयम्- ब्रह्मकाण्डम्, सत्यनारायणशास्त्री खण्डूडी (सं), कृष्णदास अकादमी, वाराणसी- २२१००२, प्रथमं संस्करणम्- १९८७.

: वाक्यपदीयम् - वाक्यकाण्डम्, पुण्यराजकृतया टीकया, श्रीरघुनाथशर्मप्रणीतया अम्बाकर्त्रीव्याख्यया च सहितम्, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी- २२१००२, द्वितीयं संस्करणम्- १९८०.

: सवृत्तिवाक्यपदीयद्वितीयकाण्डम्। पुण्यराजकृत-टीकोपेतम्। के. ए. सुब्रह्मण्य अय्यर् (सं), मोतीलाल् बनारसीदास, दिल्ली- ११००२८, प्रथमं संस्करणम्- १९८३.